आमर्षः, पुं, (मृष + घञ् + नञ्समासः। अन्येषामपीति दीर्घः।) क्रोधः। इत्यमरटीकायां भरतः॥ ("निरुद्योगं निरामर्षं निर्वीर्य्यमरिनन्दनं"। इति रामायणे।)

आमलकं, क्ली, (आ + मल + क्वुन् शिल्पिसंज्ञयोः। आमलक्याः फलं। फले लुगिति विकारावयवप्रत्ययस्य लुक्॥) आमलकीविशेषः। काठ आमला इति भाषा। तत्पर्य्यायः। काष्ठधात्रीफलं २ क्षुद्रामलकं ३ क्षुद्रजातीफलं ४। अस्य गुणाः। कषायत्वं। कटुत्वं। शीतत्वं। पित्तास्रदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ ("तद्वदामलकं शीतमम्लं पित्तकफापहं"। इति वाभटः॥ "विद्यादामलके सर्व्वान् रसान् लवणवर्ज्जितान्। स्वेदमेदःकफोत्क्लेदपित्तरोगविनाशनं"॥ इति चरकः।)

आमलकः, पुं, (आङ् + मल + क्वुन्।) वासकवृक्षः। इति शब्दचन्द्रिका। (यथा मार्कण्डेयपुराणे। "भल्लातकानामलकांस्तिन्दुकांश्च महाफलान्"।)

आमलकी, स्त्री, (आङ् + मल + क्वुन् + जातेरिति ङीष्।) स्वनामख्यातफलवृक्षविशेषः। आमला इति भाषा। तत्पर्य्यायः। तिष्यफला २ अमृता ३ वयस्था ४ वयःस्था ५ कायस्था ६। इत्यमरस्तट्टीका च। श्रीफला ७ धात्रिका ८ शिवा ९ शान्ता १० धात्री ११ अमृतफला १२ वृष्या १३ वृत्तफला १४ रोचनी १५। इति राजनिर्घण्टः॥ कर्षफला १६ तिष्या १७ इति रत्नमाला॥ अस्या गुणाः। हरीतकीगुणवद्गुणत्वं। विशेषेण शुक्रकारित्वं। शीतवीर्य्यत्वं। अम्लत्वात् वायुनाशित्वं। शैत्यमाधुर्य्यात् पित्तनाशित्वं। कषायरूक्षत्वात् कफनाशित्वं। सर्व्वफलाधिकगुणत्वं। भोजनादामध्यान्ते प्राशस्त्यं। निरत्ययत्वं। दोषहरत्वञ्च॥ अस्य मज्जगुणाः। तृष्णाच्छर्द्दिकफवायुनाशित्वं। लघुत्वं। कषायत्वं। बलकारित्वञ्च। इति राजवल्लभः॥ अपि च। लघुत्वं। दाहवमिमेहशोषनाशित्वं। रसायनत्वं। कटुत्वं। रुचिकरत्वं। रक्तदोषनाशित्वं। श्रमविबन्धाध्मानविष्टम्भदोषप्रशमनकारित्वञ्च। अस्य मज्जनो विभीतकमज्जवद्गुणत्वञ्च। इति राजनिर्घण्टः॥ (अस्या नामानि गुणाश्च।
"त्रिष्वामलकमाख्यातं धात्री तिष्यफलामृता।
हरीतकीसमं धात्रीफलं किन्तु विशेषतः॥
रक्तपित्तप्रमेहघ्नं परं वृष्यं रसायनम्।
हन्ति वातं तदम्लत्वात् पित्तं माधुर्य्यशैत्यतः॥
कफं रूक्षकषायत्वात् फलं धात्र्यास्त्रिदोषजित्।
यस्य यस्य फलस्येह वीर्य्यं भवति यादृशं॥
तस्य तस्यैव वीर्य्येण मज्जानमपि निर्द्दिशेत्"।
इति भावप्रकाशः॥
"तान् गुणांस्तानि कर्म्माणि विद्यादामलकीष्वपि।
यान्युक्तानि हरीतक्यां वीर्य्यस्य तु विपर्य्ययः"॥
इति चरकः।)
तच्छुष्कफलगुणाः। कफपित्तनाशित्वं। अम्लत्वं। स्वादुकषायरसत्वं। पाके पित्तनाशित्वञ्च। इति राजवल्लभः॥ तस्या उत्पत्तिर्यथा। सख्यावूचतुः।
"उक्तस्त्वया महेशानि तुलसीबिल्वसम्भवः।
अनयोस्तुल्य एकः कः शिवविष्णुप्रियस्तवः॥
तदावां श्रोतुमिच्छावः शिवसुन्दरि कथ्यतां"।
देव्युवाच।
"अस्ति बिल्वतुलसीतरुतुल्यः
पुण्य एक उत विष्णुशिवार्हः।
नामतोऽमलक इत्यपि सख्यौ
रोपितः कमलयाथ मयापि॥
कदाचित् देवयात्रायां प्रभासे पुण्यतीर्थके।
सर्व्वे देवाः समायाता दिने पुण्ये च कुत्रचित्॥
तत्राहञ्च स्वयं लक्ष्मीरेकस्थाने समागते।
तत्रावयोर्मतिर्जाता शिवविष्णुप्रपूजने॥
अहं श्रियमवोचञ्च सामुद्रि शृणु मे मतिं।
स्वकल्पितेन द्रव्येण पूजयेऽहं हरिं प्रभुं॥
मामुवाच ततो लक्ष्मीर्गद्गदाक्षरभाषिणी॥
ममाप्येवं मतिर्जाता त्वमवोचः स्वयं यथा।
स्वकल्पितेन द्रव्येण पूजयेऽहं त्रिलोचनं"॥
देव्युवाच।
"सजये विजये देवि! नावेवम्भूतयोस्तदा।
नयनेषु सुजातानि अमलाश्रुजलानि च॥
तानि नौ नयनेभ्यश्च निपेतुर्भुवि हे सखि!।
ततो जाता द्रुमाः पृथ्व्यां चत्वारो विमलप्रभाः॥
ख्याता आमलकी नाम्ना जाता कादमलाद्यतः।
श्यामलच्छदवृन्दास्ते कर्व्बूरस्कन्धमूलकाः॥
शिराग्रथितपत्राली पत्रमालाकपत्रका।
बिल्वस्य च तुलस्याश्च ये गुणाः कथिताः सखि॥
ते ते गुणाः सर्व्व एव आमलक्यां समाश्रिताः।
पत्रमालादलैरस्याः शिवविष्णू सुरेश्वरौ॥
सर्व्वथा पूजितौ स्यातां सख्यौ नास्त्यत्र संशयः।
माघे मासि सितायां तामेकादश्यां समुद्भवां॥
शुभामामलकीं दृष्ट्वा समेताः सर्व्वदेवताः।
ऋषयस्ते सशिष्याश्च हर्षमापुः परं तदा॥
शिवाद्युवत्सरूपाश्च ददृशुस्तद्रुवृक्षद।"॥ ०॥
अस्या नमस्कारमन्त्रादिः।
"नमाम्यामलकीं देवीं पत्रमालाद्यलङ्कृता।
शिवविष्णुप्रियां दिव्यां श्रीमतीं सुन्दरप्रभां॥
एतेन खलु मन्त्रेण सर्व्वा अस्याः क्रिया मताः।
एतामुद्दिश्य तीर्थानि श्रीयुक्तानि मनीषिभिः॥
बिल्ववृक्षवदेवेह पृथिव्यां कर्म्मणां स्थले।
सिषिचुस्तामामलकीं सर्व्वतीर्थजलैर्द्विजाः॥
अथ सर्व्वसुराश्चापि मुनीनाञ्च तदायतः।
मया संपूजितः कृष्णः श्रीश्च शम्भुमपूजयत्॥
तदा जयजयध्वानो बभूव क्षितिमण्डले।
आकाशे पुष्पवृष्टिश्च शङ्खशब्दाश्च पुष्कलाः॥
दृष्ट्वा ह्यामलकी देवी दधारानन्दमुत्तमं।
तेन धात्रीति नाम्नापि राजत्यामलकी शुभा॥
नमस्कृत्य ह्यामलकीं गता देवा द्विजास्तथा।
ब्रह्मविष्णुशिवाश्चापि तत्राधिष्ठानमाश्रिताः॥
जाता ह्यामलकी देवी परमानन्ददायिनी।
मान्या स्थाप्या च पूज्या च भवतीनां सखीप्रियं"॥
इति बृहद्धर्म्मपुराणे आमलकीप्रादुर्भावः १२ अध्यायः॥ *॥ एकादश्यां तत्र विष्णुप्रीतिर्यथा।
"तुष्यत्यामलकैर्विष्णुरेकादश्यां विशेषतः।
श्रीकामः सर्व्वदा स्नानं कुर्व्वीतामलकैर्न्नरः"॥
इति गारुडे २१५ अध्यायः॥

आमवातः, पुं, (आमोऽपाकहेतुः वातः।) स्वनामख्यातरोगविशेषः। तस्य निदानपूर्व्विकां संप्राप्तिमाह।
"विरुद्धाहारचेष्टस्य मन्दाग्नेर्निश्चलस्य च।
स्निग्धं भुक्तवतो ह्यन्नं व्यायामं कुर्व्वतस्तथा॥
वायुना प्रेरितो ह्यामः श्लेष्मस्थानं प्रधावति।
तेनात्यर्थमपक्वोऽसौ धमनीभिः प्रपद्यते॥
वातपित्तकफैर्भूयो दूषितः सोऽन्नजो रसः।
स्रोतांस्यभिष्यन्दयति नानावर्णोऽतिपिच्छिलः॥
जनयत्यग्निदौर्ब्बल्यं हृदयस्य च गौरवं।
व्याधीनामाश्रयो ह्येष आमसंज्ञोऽतिदारुणः॥
विरुद्धाहारचेष्टस्य विरुद्धाहारः क्षीरमत्स्यादि। विरुद्धा चेष्टा भुक्त्वा व्यायामादि। तद्युक्तस्य। निश्चलस्य निर्व्यापारस्य। "स्निग्धं भुक्तवतो ह्यन्नं व्यायामं कुर्व्वतः" इति मिलितो हेतुः। श्लेष्मस्थानं आमाशयसन्ध्यादि। तेन श्लेष्मस्थानगतेन अत्यर्थं अपक्वः। पित्तस्थानगमने तु पक्वोऽभविष्यदित्यभिप्रायः। असौ आमः धमनीभिः प्रपद्यते धमनीमार्गैश्चलति। भूयो दूषितः अतिशयेन दूषितः। सोऽन्नजो रसः। आमः स्रोतांसि अभिष्यन्दयति संस्तभ्य रसवहशिरावरोधं कृत्वा स्रोतांसि गुरूणि करोति। नानावर्णः वातादिजनितवर्णभेदान्नानावर्णः॥ *॥ आमस्य लक्षणमाह।
"अजीर्णात् यो रसो जातः सञ्चितो हि क्रमेण वै।
आमसंज्ञां स लभते शिरोगात्ररुजाकरः"॥
अजीर्णात् भुक्तादजीर्णात्॥ *॥ आमवातस्य सामान्यलक्षणमाह।
"युगपत् कुपितावेतौ त्रिकसन्धिप्रवेशकौ।
स्तब्धञ्च कुरुते गात्रमामवातः स उच्यते"॥
एतौ वातकफौ। त्रिकसन्धिप्रवेशकौ वेदनयेति बोद्धव्यौ॥ *॥ तन्त्रान्तरे तस्य लक्षणान्तरमाह।
"अङ्गमर्द्दोऽरुचिस्तृष्णाह्यालस्यं गौरवं ज्वरः।
अपाकः शूनताङ्गानां आमवातस्य लक्षणम्"॥ *॥
अस्यैवातिवृद्धस्य लक्षणमाह।
"स कष्टः सर्व्वरोगाणां यदा प्रकुपितो भवेत्।
हस्तपादशिरोगुल्फत्रिकजानूरुसन्धिषु॥
करोति सरुजं शोथं यत्र दोषः प्रपद्यते॥
स देशो रुज्यतेऽत्यर्थं व्याविद्ध इव वृश्चिकैः॥
जनयेत् सोऽग्निदौर्ब्बल्यं प्रसेकारुचिगौरवम्।
उत्साहहानिं वैरस्यं दाहञ्च बहुमूत्रतां॥
कुक्षौ कठिनतां शूलं तथा निद्राविपर्य्ययं।
तृट्छर्द्दिभ्रममूर्च्छाश्च हृदयं विड्विबद्धतां॥
जाड्यान्त्रकूजमानाहं कष्टांश्चान्यानुपद्रवान्"।
यदा प्रकुपितो भवेत् प्रकर्षेण कुपितः स्यात्तदा वक्ष्यमाणानुपद्रवान् करोति। तानाह हस्तेत्यादि। यत्र दोषः दुष्ट आमः प्रपद्यते गच्छति। जाड्यं अकर्म्मण्यत्वं। अन्यानुपद्रवान् कलायखञ्जादीन्